स्वर्गवासी साधुचरित श्रीमान् डालचन्दजी सिंघी



बाबू श्री बहादुरसिंहजी सिंघीके पुण्यश्लोक पिता

जन्म–वि. स. १९२१, मार्ग वदि ६]  [स्वर्गवास–वि स १९८४, पोप सुदि ६

दानशील साहित्यरसिक-संस्कृतिप्रिय

स्व बाबू श्री बहादुरसिंहजी सिंघी



अजिमगंज-कलकत्ता

जन्म- ता २८ ६ १८८५ ]　　　[ स्वर्गवास- ता० ७ ७-१९४४

SINGHI JAIN SĀSTRA SIKṢĀPĪTHA
SINGHI JAIN SERIES—73

FOUNDER GENERAL EDITOR — Late ACHARYA JINA VIJAYA MUNI

GENERAL EDITOR
Mahāmahopādhyaya Prof JAYANTAKRISHNA HARIKRISHNA DAVE,
M A , LL B , Vidyavachaspati
*Hon Director*, Bharatiya Vidya Bhavan

# MANTRARĀJA RAHASYAM

OF

# ŚRĪ SIMHATILAKASŪRI

*Critically Edited*
*By*
ACHARYA JINA VIJAYA MUNI

*With a General Introduction*
*By*
Mahamahopādhyaya Prof JAYANTAKRISHNA HARIKRISHNA DAVE

1980
BHARATIYA VIDYA BHAVAN
KULAPATI K M MUNSHI MARG
BOMBAY-400 007

*All Rights Reserved*

*First Edition—1980*

**Price Rs. 50**

PRINTED IN INDIA

By V. Varadarajan at Associated Advertisers & Printers, 505, Tardeo Arthur Road, Bombay-400 034 and Published by S Ramakrishnan, Executive Secretary, Bharatiya Vidya Bhavan, Kulapati K M. Munshi Marg, Bombay-400 007

# सिंघी जैनशास्त्र शिक्षापीठ

सिंघी जैन ग्रन्थमाला–ग्रन्थाँक ७३

आदि प्रधान सपादक स्व आचार्य जिनविजय मुनि

प्रधान सपादक महामहोपाध्याय प्रा जयन्तकृष्ण हरिकृष्ण दवे
एम् ए, एल्एल् बी विद्यावाचस्पति
मानार्ह नियामक भारतीय विद्या भवन


श्रीसिंहतिलकसूरिविरचितं

# मन्त्रराज रहस्यम्


सविमर्श सपादक·

आचार्य जिनविजय मुनि

प्रास्ताविकम्

महामहोपाध्याय प्रा जयन्तकृष्ण हरिकृष्ण दवे



भारतीय विद्या भवन

बम्बई ४०० ००७


१९८०] सर्वाधिकारा सुरक्षिता [मूल्य रु ५०

shri" by the Government of India He became a member of the German Oriental Society and was also the President of the Gujarat Itihasa Parishad

He remained the Hon Director of the Bhavan till 1954 when he formally retired to work more vigorously at Jaipur, and thereafter I was asked to be the Hon Director As stated above, he moved from place to place, from time to time, and subsequently on account of age, failing health and more particularly his failing eye-sight, the tempo of publication of the *Singhi Jain Series* became slow, more particularly because he was keen to write an exhaustive Introduction to each publication himself In spite of repeated requests from me, it was not possible for him to write these Introductions in view of the aforesaid difficulties However, the Bhavan was able to bring out two volumes in 1966 and 1967 by Dr A N Upadhye and Tarunaprabhacharya's *Shadavasyaka-Balavabodhavritti* edited by late Dr Prabodh Bechardas Pandit in 1976 The last-mentioned work contains in detail an exhaustive Introduction by Muniji, written at my repeated special requests, and gives the history of this series Even though it is named as *Singhi Jain Series*, Muniji has included in it many non-Jain works also The series has gained international recognition and is referred to as a prestigious publication in the Report of the Sanskrit Commission appointed by the Government of India

---

## MANTRARAJA RAHASYA

'Mantraraja Rahasya (Gram 800) by Simhatilakasuri, pupil of Vibudhachanda, pupil of Yasodeva, was composed in S Y 1322 according to catalogue of MSS in Jesalmere Bhandaras published by G O Series p 58, the date is however given as S Y 1332 in the Prasasti and the JHA list (list of MSS in the inner Bhandara of Sri Harisagaragani of Jaipur)" — *Jinaratnakosa* Vol I, p 301 by Prof H D Velankar

Simhatilakasuri also wrote a commentary on this work called *Lilavati* He is also the author of *Vardhamana-Vidya Kalpa*, *Ganita-tilaka-vritti* also a Vritti on Bhuvanadipaka of Padmaprabhasuri written in S Y 1326

Jainism does not believe in a conscious first principle which is the creator of the world The world is Anadi But it believes in Tirthankaras who by their Tapas and Vitaragatattva have attained the status of Parameshthi They are worshipped with great devotion like the Gods of orthodox Hindus The idols are to be worshipped, so that the devotee may inculcate in himself the Vitaragatattva by contemplating on the object of devotion This Dhyanayoga is divided into Dharmadhyana and Sukladhyana Dharmadhyana is of four varieties — Pindastha, Padastha Rupastha and Rupavarjita Out of these, the Padastha variety has reference to Varna, Pada and Vakya In this variety of Dhyana there is the Bheda of the 6 chakras and

the divinity is worshipped in the form of Varna or Mantra This variety of Dhyana is very similar to that of the orthodox Hindus and the procedure of Mantrasastra of Hindus and Jains is very much common As a matter of fact, Tantras of Hindus, Jains and Buddhists have developed simultaneously and there are many common features

With the help of Dhyana, the Arhat is to be experienced in the head There are numerous Mantras in this connection. Reference may be made to the 8th chapter of Hemachandra's *Yogasastra* Om, Hrim, Arhat and other Bija Aksharas form part of the Mantras Every Tirthankara is associated with one Sasana Devata Chakresvari is the Sasanadevata of Rishabhanatha, Padmavati of Parsvanatha and Siddhayika of Mahaviraswami according to the Svetambara view

Vaidika, Jain and Buddhist religions have mutually influenced each other They are not absolutely different but can be said to be the branches of one old religion Jina is one who has conquered the mind, speech and body His followers are Jains Tirthankara is one who saves the Jivas from the ocean of Samsara Tirtha means the shore of the Ocean The Tirthankaras, 24 in number, have laid down the Jain Sasana The first Tirthankara is Rishabhadeva, who is also considered as one of the 24 Avataras of Vishnu by the orthodox Hindus The 23rd Tirthankara was Parsvanatha who flourished about 250 years before Mahaviraswami His name is mostly connected with the Mantra Sastra Mahaviraswami was the senior contemporary of Buddha and was born in 539 B C (or 599 B C according to another view) He was first in the womb of Devananda (a Brahmin lady) but was transferred to the womb of Trisala (a Kshatriya lady) His name was Vardhamana and he belonged to the Nata race He became Yati at the age of 30 and had the Kevala Jnana at the age of 42 He preached his upadesa for 30 years thereafter His eleven disciples, all Brahmins, were called Ganadharas The chief among them were Gautama, Indrabhuti and Sudharma. Chandana was the first Sadhvi The Jain Sangha consists of Sadhus, Sadhvis, Sravakas and Sravikaas Jains are mainly divided into Svetambaras and Digambaras About three centuries back there arose a sub-section of Svetambaras called Sthanakavasis

Mahaviraswami gave only oral upadesa, but his Ganadharas collected his upadesa into old works and preserved the same The Jain scriptures are (1) Purva and (2) Anga Purvas are 14 and Angas are 12 Purvas were so called because they were composed earlier than the Angas Thereafter, there were 12 Angas, the main part of which is composed by Sudharmaswami Purvas are said to be lost In the 12 Angas, one Anga was called Drishtivada in which according to some, the remnants of the 14 Purvas were preserved But even that Anga, as well as the Purvas, are said to have been lost Contents of Purvas are known only from references here and there After the Angas there are 12 Upangas — eleven of which are by Sudhar-

maswami Moola, Chheda, Kalpasutra and Niryuktis etc form the other sacred literature

Digambaras say that Jain scriptures were written out in book form in the second century A D while Svetambaras believe that they were put in book form in 513 A D by Devardhigani Kshamasramana at Valabhipur

*Mantras and Vidyas are said to have formed part of the* 10th Purva called Vidyanupravada of the 14 Purvas Mantra has a male deity while Vidya has a female deity

treatise *Compa-*
148 opines that
who was prior
to Mahaviraswami and is therefore called Purva or prior in age Some of the Parsvapatyas i e disciples of Parsvanatha were adept in Nimittasastra (part of 9th *Purva*), were *Bahusruta* and are said to possess even the knowledge of 14 Purvas Shri Jhaveri therefore is of the view that the Jain Mantric literature in Vidyanupravada may be reasonably supposed to belong to the age of Sri Parsvanatha Bhairava Padmavati Kalpa, of which Shri Jhaveri's book is an Introduction, is with reference to Padmavati Devi who is the attendant deity of Parsvanatha

Knowledge of Nimitta (Science of Prediction) required *proficiency in Vidyas and Mantras Nimitta, Mantra and Medi-*cine gave livelihood to many who occupied a position interme-

old

The Panchaparameshthi Mantra is an obeisance to Arhats, Siddhas, Acharyas, Upadhyayas and Sadhus It is considered as destroying all sins and bestower of all mangala Like the Vedic Gayatri of Hindus, it is Jain Gayatri and recited in all *religious ceremonies*

Simhatilakasuri the author of *Mantraraja Rahasya*, has also written *Vardhamanavidya Kalpa* It is the sacred Vidya *of Shri Vardhamana Mahavira and is meant to be recited by all* Sadhus daily, except Acharyas who have to recite instead the Suri Mantra

*When* Shri Mahavira *granted* permission to his Ganadharas in respect of Tirtha Dharma and Gana, he dropped scented powder i e Vasakshepa on their heads On this and similar occasions there was recitation of the Suri-Mantra composed by Shri Gautama Ganadhara at the instance of Shri Mahavira

This Suri-Mantra, also called Ganivijja, has come down from preceptor to pupil for centuries right from Gautama Swami, the first disciple of Sri Mahavira Some say that it is

connected with the 1st Tirthankara, Shri Rishabhadeva, and his Ganadhara Pundarika This Mantra is referred to in *Nirvanakalika* of Padalipta Suri, which work gives this and many other mantras as also the detailed ceremony for installation of idols and allied ceremonies Shri Jhaveri has edited this work and considers it very old From Padalipta has come the word Palitana Bhadraguptacharya's *Anubhava S ddha Mantradwatrinsika* and *Vardhamana Vidya-Kalpa* also refer to the Suri Mantra Shri Gautama is to be contemplated as seated in a golden thousand-petalled lotus He was possessed of miraculous powers There is great phalasruti for those who recite this mantra

According to many Suri Mantra Kalpas including Simhatilakasuri's *Mantraraja Rahasya*, this Mantra is connected with the first Tirthankara Rishabhadeva. There are five Pithas of this Mantra Brahmi was the deity of the 1st Pitha called Vidyapitha The second Pitha refers to Bahubali-Vidya — this Bahubali is identified with the son of Rishabhadeva *Mantraraja Rahasya* says that there are 1000 Vidyas connected with the 1st Pitha — 20 Vidyas are comprised in each of the 50 Labdhipadas forming the 1st Pitha Labdhi means the miraculous power of the soul This *Mantraraja Rahasya* of Simhatilaka Suri has the commentary called Lilavati which is a collection of Suri Mantra Kalpas of different gachchhas and gives different versions of the Suri Mantra

The worship of Suri Mantra is the privilege of the Acharyas Ordinary Sadhus worship Vardhamana Vidya and its connected Yantra Panchaparamesthi mantra in the form of Navapada is worshipped by the laity

Jainas have not favoured the Panchatatva worship which was common in the Sthula form in the Vamachara Sakta worship Jains mostly follow the Kashmir Sampradaya which is Satvika in nature Among Hindus, the work of Lakshmana-Bhatta of Kashmir called *Sarada tilaka* is a very sober and reputed work and gives Tantra principles in great detail Jain tantra can be favourably compared with Samayachara worship propounded by Sankaracharya Tripura is considered as another form of Saraswati Jains have favoured the Saraswati Kalpa of the Sakta-Sampradaya *Balachandra Suri was known* as Siddha-Saraswata Acharya Saraswati is considered to have 16 Vidya Vyuhas

of Ambikadevi, given to Manadeva Suri, in Sri Brihad gachcha Mulasakha and is given in the line of disciples of Manadeva Suri This information is taken from what is written in his own hand by Acharya Atmaramaji, i e Vijayananda Suri

The 3rd Parisishta gives the Smaranavidhi of this Suri Mantra [illegible] the Sandhya-Vibhag [illegible] In all, there are 17 [illegible] Jinavijayaji Several [illegible] given in those other Parisishtas Thus, this book is a complete treatise on the Suri Mantra which is the Mantraraja

In the Tantra, Mantra is a very sacred thing and it is fruitful and rewarding only if taken from a properly qualified guru who can do the Saktipata on the disciple and generate spiritual power in him Before books were printed, Mantras were meticulously concealed and given to deserving disciples in secrecy But after the publication of books all literature, including the one of Mantra Sastra is made public But it must be remembered that any practice of the Mantra merely on reading of books is not only not rewarding but is considered positively harmful

Lakshmidhara the reputed commentator of *Saundarya Lahari* of Sankaracharya, while giving the Uddhara of the Shodasi Mantra says that those who read his book are considered as his disciples and there is therefore no harm in putting down the Uddhara in a book form

Mantra is the Vangmaya Vigraha of the deity Yantra is a geometrical figure in various lines angles, circles etc and words of the Mantra are also inscribed therein Mudra is the gesticulation of hand and fingers to please the deity Dr Priya bala Shah has edited two Jain works — *Mudravichara* and *Mudravidhi*, which give 73 and 114 mudras respectively

This *Mantraraja Rahasya* was edited by Muni Jinavijayaji He intended to write an Introduction to it himself, but for reasons stated above he could not do so The text, as edited by him is now placed before the world of scholars

JAYANTAKRISHNA H DAVE

*Hon Director, Bharatiya Vidya Bhavan*

and

*General Editor Singhi Jain Series*

BHARATIYA VIDYA BHAVAN
*Bombay-400 007*

श्रीसिंहतिलकसूरिविरचितं

# मन्त्रराजरहस्यम् ॥

॥ ॐ नमः । श्रीवीतरागाय नमः ॥

[ मङ्गलाचरणम् — ]

नत्वा जिनं गुरुं किञ्चिद् ज्ञानं वक्ष्यामि सिद्धिकृत् ।
पञ्चाशल्लब्धयः सुष्ठुव्रतभाजाममूर्मताः ॥ १

[ पञ्चाशल्लब्धयः — ]

जिनावधि - परानन्तानन्तानन्तावधेर्जिनाः ।
सर्वावधिजिना बीज - कोष्ठबुद्धि - पदानुगाः ॥ २

संभिन्नश्रोतसः क्षीर - मध्वास्रवामृतास्रवाः ।
अक्षीण - जल्ल - खेलाऽऽमर्ष - विप्रुट् - सर्वाग्निमौषधिः ॥ ३

वैक्रियः सर्वलब्धिश्च ऋजुश्च विपुला मतिः ।
जङ्घा - विद्या - मन्त्रामुनि - विद्यासिद्ध - नभोगमाः ॥ ४

[1]दीप्त - शीत - तेजोलेश्या दृष्ट्याशीविष - वाग्विषाः ।
चारणास्तु महास्वप्नास्तैजसाऽग्निनिसर्गिणः ॥ ५

वाग्यष्टाङ्गनिमित्तज्ञाः मतिमामतिपन्नकाः ।
जिनैरल्पमतिपन्ना अणिमाद्यष्टसिद्धयः ॥ ६

केवलित्रितयं चोग्रतपो - दीप्त - तपस्विनः ।
चतुर्दश - दशपूर्वविद एकादशाङ्गवित् ॥ ७

[ कर्मभवा लब्धयः — ]

महाराज - महाश्रेष्ठि - चक्रभृत्त्रितयं बलः ।
एता लब्धयः कर्मभवा न ध्यानजाः स्फुटम् ॥ ८

---

1 लब्ध A ।

[ लब्धिपदोत्पन्नविद्यासहस्रम् — ]

एकैकलब्धिभाजः स्युर्विद्याविंशतिसिद्धयः ।
विद्यासहस्रमित्येतत् पञ्चाशल्लब्धिगं मतम् ॥ ९

[ आद्यपीठाधिदेवता — ]

आद्यपीठे इदं ब्राह्मयध्यक्षं बाहुबलेः पुरः ।
आख्यनाभिभवः पीठस्यास्य ब्राह्मयधिदेवता ॥ १०

[ विद्या-मन्त्रयोर्लक्षणम् — ]

तथा मन्त्रसहस्रं च मन्त्रराजान्तरानुगम् ।
विद्या ससाधना मन्त्रः पाठसिद्धोऽत्र [1]लक्षणे ॥ ११

[ लब्धिपदानां कृत्यकारित्वम् — ]

लब्धि-स्तुतिपदैकत्वमथैषां कार्यकृत् क्रमः ।
समणय-नमःपूर्वमिष्टदाः सर्वलब्धयः ॥ १२

जिनावधि-परानन्तानन्तानन्तावधेर्जिनाः ।
केवलित्रयमित्यष्टौ पट्टे कर्पूर-चन्दनैः ॥ १३

विलिख्य तदधो वद्भ्याऽभिधां च कुसुमैः सितैः ।
अर्चाऽष्टाविसहस्रेण त्र्यहात् तद्बन्धमोक्षकृत् ॥ १४

उग्रतपश्चरणाद्या दीप्त-तप्ततपस्विनः ।
प्रतिमामतिपन्नाश्च चतुर्भिर्दिक्चतुष्टये ॥ १५

वज्रपञ्जरमाधाय तदन्तः स्वं विचिन्तयन्[2] ।
परविद्याच्छिदां कुर्यादजय्यः सप्तरात्रतः[3] ॥ १६

महातपो-घोरतपो-महाघोरतपस्त्रयम् ।
उग्र-दीप्तपदान्तर्यदात्तं पृथग् न लब्धिषु ॥ १७

चतुर्दश-दशपूर्वा एकादश-दशाङ्गभृत् ।
पदानुग-ऋजुमति-विपुलमतयश्च षट् ॥ १८

---

1 लक्षणं A । 2 °येत् A । 3 °रात्रित A ।

अनम्ल-लवणाहारो यदि चैकान्तराशनः ।
जातीपुष्प-सहस्रार्कजापः सारस्वतप्रदः ॥ १९

कफ-विप्रुड्-मलामर्श-सर्वौषधिपञ्चकम् ।
आलिख्य सुरभिद्रव्यैः पात्रे रोग्यभिधामधः ॥ २०

अष्टाधिकसहस्रेण सितपत्रैर्दिनत्रयम् ।
जपन् मन्त्राक्षरांश्चन्द्रभासो रोगिवपुः प्रति ॥ २१

सुधां वर्षत्यनुध्यायन् गोपयःक्षालितं च [1]तम् ।
[2]पाययेदुज्ञनादम्भःप्रदानैः कुष्ठरोगहृत् ॥ २२

अल्पमृत्युर्नृणां मारिरुन्मादोऽथ ग्रहग्रहः ।
शाम्यन्ति रोगदोषाश्च क्रमाद् वा पदपञ्चकात् ॥ २३

विद्यासिद्ध-क्षीरास्रव-मध्वास्रवामृतास्रवाः ।
चतुष्कं पूर्ववद् ध्यातं स्थावरादिविषापहम् ॥ २४

सर्पिः-स्रवास्रवलब्धी इह क्षीरास्रवान्तरा ।
तदमूर्लब्धिसंख्यायां पृथग् नोक्ते न दूषणम् ॥ २५

अष्टादशकुष्ठहरं सर्वज्वरहरं परम् ।
सर्वोपसर्गनाशि स्यादास्रवत्रितयं क्रमात् ॥ २६

बीजबुद्धि-कोष्ठबुद्धी संभिन्नश्रोतसस्तथा ।
अक्षीणमहानसिकाः सर्वलब्धिश्च पञ्चकम् ॥ २७

प्राग्वदालिख्य सत्पुष्पैरष्टोत्तरसहस्रकैः ।
जापात् त्र्यहाद् भवेल्लाभस्तद्वदक्षीणकोशता ॥ युग्मम् ॥ २८

वैक्रियर्द्धि-नभोगामि-जङ्घा-विद्याचरा इति ।
चतुष्कं सर्वदिग्भासि त्रैलोक्योपरि दोपहृत् ॥ २९

तेजः-शीत-तप्तलेश्या दृगाशीर्विष-वाग्विषाः ।
चारणास्तु महास्वप्नास्तैजसाऽग्निनिसर्गकाः[3] ॥ ३०

---

1 तत् A । 2 °ज्ञनेनाम्भः A । 3 °र्गकेः J ।

नवेति मातृस्तुतिपदैर्युक्तानि स्वर्णभाजने ।
कर्पूर-चन्दनालिप्ते विलिख्य समवासृति ॥ ३१

[ यन्त्रालेखनम् – ]

'ॐ अर्हं' पूर्वं श्रीयुगादिनाथाय पवन-गगनान्तम् ।
तस्याधो रोग्यभिधां पूर्वस्यां दिशि 'विनीतायाम्' ॥ ३२

'राज्यं करोति' धनदाशायां 'राज्यं ददाति पुत्रेभ्यः' ।
'दीक्षां गृह्णाति विभुः श्रेयांसात् पारणं वर्षे' ॥ ३३

दक्षिणदिशि 'मौनधनो विचरति' वरुणस्य दिशि 'लसज्ज्ञानः ।
देवासुर-मनुजसभावन्द्यपदो धर्ममुपदिशति' ॥ ३४

आलिख्य चिन्तयन्निह समग्रमन्त्राष्टयुतशतस्य जपः ।
शतपत्रार्चा 'भक्तामर'स्तवः 'शान्ति'भणनं च ॥ ३५

अष्टोत्तरशतकलशैस्तीर्थाम्बुभृतैश्च जन्मकल्याणम् ।
स्मृत्वा कृत्वा [1]स्नात्रं तत्सिक्तः स्वस्थ एवार्त्तः ॥ ३६

चिरदोषे नृपवादे विघटितकार्येषु सर्वथा विपदि ।
मायुक्तं सर्वमिदं कार्यं सकलाशिवोपशमः ॥ ३७

[ विद्याष्टकम् – ]

'यैः शान्तराग'मुख्यान्यष्टौ विद्याष्टकान्वितानीह ।
मातर्वृत्तानि पठति स स्वस्य परस्य शान्तिकरः ॥ ३८

इत्यष्टकार्यकारीह विद्याष्टकमिदं क्रमात् ।
प्रयोज्यं [2]वर्मितं धर्मवित्सु [3]नान्येषु कुत्रचित् ॥ ३९

[ लब्धिपदाना जापविधि – ]

उक्तादन्येषु लब्धीनां पदेषु स्वाभिधाऽनुगा ।
कार्यसिद्धिरिह ज्ञेयोत्सर्ग-ध्यान-जपादिभिः ॥ ४०

आदौ लब्धिपदान्युक्त्वा सर्वेभ्य एभ्य एपयेत् ।
'नत्वा प्रयुञ्जे यां विद्यां सा मे विद्या प्रसिद्ध्यतु' ॥ ४१

1 स्नान A । 2 दर्शित A । 3 मान्येषु A ।

इत्युक्तिपूर्वकं जापः सर्वत्राष्टोत्तरं शतम् ।
कायोत्सर्गोपवासाद्यं ज्ञेयं तत्सिद्धिदायकम् ॥ ४२

पञ्चाशल्लब्धिमध्यात् तु चत्वारिंशत्पदानि[1] यत् ।
दृश्यन्ते वाचनास्वादावतस्तेषां प्रदर्शनम् ॥ ४३

[ वाचनास्वादौ चत्वारिंशल्लब्धिपदनामानि – ]

"जिनावधि-परानन्तानन्तानन्तावधेर्जिनाः ।
केवलि-भवा-ऽभवस्थ-केवल्युग्रतपश्चराः ॥ ४४

चतुर्दश-दशपूर्वैकादशा अङ्गधारिणः[2] ।
वैक्रियर्द्धि-सर्वलब्धी ऋजुश्च विपुला मती ॥ ४५

प्रज्ञाश्रम-जङ्घागति-विद्यासिद्ध-नभोगमाः ।
कफ-विप्रुण्मलामर्श-सर्वौषध्यश्च वागृविषाः ॥ ४६

आशीविष-निमित्तज्ञाः संभिन्नश्रोतसस्तथा ।
तप्तलेश्या-शीतलेश्या-बीज-कोष्ठादिबुद्धयः ॥ ४७

द्वादशाङ्ग-सर्वसिद्धा अक्षीणादिमहानसाः ।
क्षीरास्रव-मध्वास्रव-सुधास्रव-मनोविदः" ॥ ४८

[ चत्वारिंशल्लब्धिपदानां कृत्यकारित्वम् – ]

एषामर्थक्रियाकृत्त्वं प्रत्येकमथ दर्श्यते ।
'ॐ नमः'[3]पूर्वका कापि 'ॐ ह्रीँ नमः'पुरः क्वचित् ॥ ४९

[ चत्वारिंशल्लब्धिपदफलम् – ]

नाभेयाच्छिलक्ष्मान्तं पुराऽऽसीदेकवाचना ।
ततस्तचैत्ययोर्वीरचैत्यतीर्थेशहेतुतः ॥ ५०

एषां जन्मादिकल्याणे स्वर्णाम्बुजस्थितं हृदि ।
पुण्डरीकं गुरुं ब्राह्मीं गौतमं च निवेशयेत् ॥ ५१

प्रातिहार्याष्टकोपेतं जिनं सातिशयं मुनिः ।
उत्सर्गेऽष्टशतं ध्यायन् विघ्नचिकाहरो भवेत् ॥ ५२

1 °नि च J । 2 °शा गण° J । 3 पूर्विका J ।

अवधिजिनं साष्टशतं कायोत्सर्गे जपन् करस्पर्शात् ।
जलपानाद् वा सर्वज्वरहर एवं च सर्वत्र ॥ ५३

परमावधिजिनजापो हरते रोगं शिरोभवं स्पर्शात् ।
कर्णरुजां तदनन्तावधिजिनजापोऽष्टशतजप्तः ॥ ५४

एवमनन्तानन्तावधिजिनजापश्च नेत्ररोगहरः ।
केवलित्रितयस्य जपाज्ज्ञानं बद्धस्य मोक्षश्च ॥ ५५

उग्रतपसो गमनहाश्चतुरधिदशपूर्वजापतस्तद्वत् ।
दशपूर्विजपाद् बाहुश्रुत्य-लवणाम्लरहितभुजः ॥ ५६

एकादशाङ्गधारिस्मृत्या गुरुवर्जितागमार्थज्ञः ।
वैक्रियलब्धेर्जापोऽरणकर्णजीरैः स्वकामाप्तिः ॥ ५७

सर्वलब्धिप्रभावात् मसृतयशाः सर्वतोऽपि शास्त्रार्दौ ।
ऋजुमति-विपुलमतीनां ध्यानं विद्विष्ट-शान्तिकरम् ॥ ५८

प्रज्ञाश्रमणर्षिजपः सितकणवीरैरुयहाद् वदत्यायुः ।
जङ्घागति-नभसिगामी काञ्जिकभुक्त्या नभोगतिं कुरुतः ॥ ५९

विद्यासिद्धध्यानं विद्याजापेषु विघ्नहरमेव ।
खेलौषधिलब्धिजपः सितपत्रैरल्पमृत्युहरः ॥ ६०

विप्रुड्लब्धिस्मरणं नरमारिं हरति सितकुसुमैः ।
समलौषधिलब्धीनां स्मृतिर्जलपानात् प्रयाति मदरोगः ॥ ६१

सर्वामर्शौषध्योर्जापो ग्रहदोष-मोक्षकृत् त्रिदिनात् ।
वागाशीर्विषजापः प्रेतवने शत्रुविद्वेषे ॥ ६२

अष्टाङ्गनिमित्तध्यानं स्वप्ने शुभाशुभं ब्रूते ।
संभिन्नश्रोतोमुनिजापात् कर्णादिभिः पश्येत् ॥ ६३

माघेऽपि तप्तलेश्यास्मृत्या शीतोज्झितोऽरिदाहकरः ।
शीतलेश्याऽध्यायी शीतो दाहज्वरार्तिहरः ॥ ६४

कोष्ठादिबुद्धिविभवो जठरोद्भवशूल-गुल्म-कृमिहारी ।
द्वादशसूत्रविदोऽमी मुसर्वसिद्धाश्च जनशान्त्यै ॥ ६५

अक्षीणमहानसिकाः सितपत्रजपेन कोशवृद्धिकराः ।
क्षीरास्रवर्षिजापात् क्षीराम्बु पिबँश्च कुष्ठनिर्मुक्तः ॥ ६६

मध्वास्रवभजापादेकाहज्वरापहारः स्यात् ।
अमृतास्रवहृत्पर्यन्तजापः सर्वोपसर्गहरः ॥ ६७

सामान्यादुत्सर्गः शतपत्राण्यष्टसहस्राद्यम् ।
सप्तादिद्वात्रिंशद्दिनान्तमम्भःकरस्पर्शात्[1] ॥ ६८

अन्यच्च, [ अप्रतिचक्रायन्त्रम्, गणधरवलयश्च — ]

षट्कोणेऽप्रतिचक्रायन्त्रं षडधिकदशद्व्यधित्रिंशत् ।
अन्तर्दलं स्तुतिर्पैन्द्री दिगन्तरे गणभृतां वलयम् ॥ ६९

[ जपभेदाः — ]

रेचक-पूरक-कुम्भा गुणत्रयं स्थिरकृति-स्मृती देका ।
नादो ध्यानं ध्येयैकत्वं तत्त्वं च जपभेदाः ॥ ७०

[ स्थलम्, आसनम्, ध्यातुर्योग्यता च — ]

एकान्तरम्यभूमावुपविश्य सुखासनो जिताक्षगणः ।
गुरुभक्तः प्रकृतिशुचिर्दृढधर्मा[2] ध्यातुमुद्यतते ॥ ७१

[ १—६. रेचकादेः गुणत्रिकस्य च लक्षणम् — ]

ब्रह्माध्वना दिनकृतं विरिच्य रोपं तमोगुणं च समम् ।
रागं च राजसगुणं कृष्णारुणमर्कमार्गेण ॥ ७२

आक्षिप्य वीतरागं सत्त्वगुणं पूरकेण चन्द्रपथे ।
कुम्भेन स्थिरयित्वा ध्यायति शान्त्यै च बन्धमोक्षाय ॥ ७३

विक्षिप्य सत्त्वमुज्ज्वलमाक्षिप्य रजो वशीकृति-स्तम्भे ।
आक्षिप्य तमश्च रुपा द्वेषोच्चाटन-मृतीः कुर्यात् ॥ ७४

यदि वा,

[3]प्रागुक्तवक्ष्यमाणे मन्त्रपदे रेचनात् पुरः पश्येत् ।
आक्षिप्य पूरकेण तु हृदि कुम्भेन स्थिरीकुर्यात् ॥ ७५

---
1 °स्पर्शः J । 2 °धर्मो ध्या° J । 3 प्रागुक्तं म° J ।

रेचकतो द्वेष-मृती पूरकतो वश्य-लाभ-संक्षोभान् ।
कुम्भकतोऽरिस्तम्भं कुर्वीत[1] त्रिगतमन्त्रपदैः ॥ ७६

[ ७. स्थिरीकरणलक्षणम् — ]

व्यालातप-शीत-रुजा [2]क्लेशावेशेऽपि मधुरभक्ष्यादौ[3] ।
न क्षुभ्यति मन्त्रपदे लीनमनास्तत् 'स्थिरीकरणम्' ॥ ७७

[ ८. स्मृतेर्लक्षणम् — ]

मन्त्रस्य हृदि स्मरणं नासाग्रे दृक् 'स्मृतिः' सकृत् सा तु ।
द्वि-त्रिरियं परिवृत्तिर्निःशब्दहृदेकतां माता ॥ ७८

[ ९. हक्कायाः लक्षणम् — ]

सहसा रोधे 'हक्का' मन्त्रान्ते क्षोभदा ग्रहाद्यपहा ।
यद्वा निःश्वासे हस्तत्सहचारी स [4]'उच्छ्वासे ॥ ७९

[ १०. नादस्यानाहतनादस्य च लक्षणम् — ]

शून्यशिरस्तद्द्वयमप्येके सर्वे स्मरन्ति मन्त्रपदम् ।
'नादो' भृङ्गध्वनिरिव शङ्खिन्युत्थस्त्वनाहतो नादः ॥ ८०

[ ११. वर्ण-मण्डलपूर्वकं ध्यानम् — ]

ध्यानं तु 'वर्ण-मण्डल'-तत्त्वानुगमत्र लब्धिमन्त्रपदम् ।
श्वेतं भू-जलमण्डल-तत्त्वगतं शान्ति-पुष्टिदं विपहम् ॥ ८१

अरुणं वह्निमण्डल-तत्त्वं प्राक् तत्त्वगं च वश्याय ।
पीतं भूमिमण्डलतत्त्वगं च कुर्यान्मुखस्तम्भम् ॥ ८२

धूम्रं च वायुमण्डल-तत्त्वगमुच्चाटनं सुहृद्द्वेषम् ।
कृष्णं व्योमान्तरगं मृत्युं कुर्वीत न प्रयुञ्जीत ॥ ८३

[ १२. ध्येयैकत्वम् — ]

ध्येयः सातिशयजिनो गणधर-देव्यादि-मन्त्रवर्णा वा ।
ध्येयेन प्राणानामैक्यं सर्वत्रगं 'तदेकत्वम्' ॥ ८४

1 °त त्रिगत° J । 2 क्लेशा° J । 3 °भक्ष्यादौ A । 4 उच्छ्वासः J ।

[ १३. तत्त्वम् — ]

आविशति पूरक-कुम्भकपवने चान्द्रेऽर्धरात्रपूर्वाह्णे ।
वाच्योऽक्षरः शुभार्थे व्यस्तो व्यस्तार्थके इदं 'तत्त्वम्' ॥    ८५

षट्कोणाकृतिदेहे विन्यस्याक्षरास्तथा [1]स्वान्तम् ।
तत्तद्वर्णाकारं कृत्वा ध्यायति[2] स सिद्धिपदम् ॥    ८६

[ सूरिमन्त्रस्यैतिह्यवृत्तम् — ]

यत् पूर्वं नाभेयः श्लोकत्रिशतानि पुण्डरीकाय ।
गणभृन्मन्त्रं प्रददौ विद्यासिद्धः स मुक्तश्च ॥    ८७

चन्द्रप्रभान्तमेवं तीर्थानुच्छेदतो बभूवास्य ।
एकैव वाचनातो भिन्ना भिन्ना तु [3]वीरान्तम् ॥    ८८

श्रीगौतमाय मन्त्रं वर्णानेकादिविंशतिशतानि ।
स्वामी ददौ तदाज्ञावश्यः श्रीगौतमोऽप्येनम् ॥    ८९

द्वात्रिंशत्श्लोकमितं चक्रे कालेन हीयमानममुम् ।
[4]अनुष्टश्लोकमितं पठिता श्रीदुःप्रसभसूरिः ॥    ९०

श्रीमत्सुधर्मगणभृत्संतानेऽप्येक एव मन्त्र इति ।
आराधि गौतमश्चेत् सर्वेऽप्याराधिता गुरवः ॥ त्रिभिर्विशेषकम् ॥    ९१

वृष-चन्द्र-सिंहलाञ्छनजिनचैत्ये ज्ञान-जन्मकल्याणे ।
दिवसे सुभिक्षदेशे तीर्थे वा रम्यभूमौ वा ॥    ९२

[ मन्त्रजापयोग्य स्थानम् — ]

राज्ञि प्रशान्तवैरे शासति लोकं विशुद्धदिग्गगने ।
रम्योपश्रुतिशकुने प्रदुष्टनर-तिर्यगीक्षणत्यक्ते ॥    ९३

[ मन्त्रजापविधि — ]

हैमे सहस्रपत्रे कमले विन्यस्य शुद्धरौप्यमयम् ।
श्रीगौतमममस्याधः 'आँ क्रोँ[5]' ह्रीँ श्रीँ' निवेश्योच्चैः ॥    ९४

---

1 स्वाङ्कम् J । 2 °ति सुसि° J । 3 वीरान्ता J । 4 अष्टैष्ट श्लोकमिम A ।
5 'क्रौं' इत्यपि पाठः प्रत्यन्तरे ।

एतेनाहूयैनं शून्यैर्भूतैश्च पञ्चभिः पूर्वम् ।
करपर्वन्यासेनाधाय स्वाङ्गेषु रक्षां च ॥ ९५

त्रैधं ब्रह्मविशुद्धो निरशनमेकं च पञ्चनिर्विकृतीः ।
कुर्वन्नप्यविभिन्नं विच्छिन्नं वा [1]जिनाङ्घ्रिदृढभक्तिः ॥ ९६

पद्मासने निविष्टो मुद्रां परमेष्ठिनः प्रवचनस्य ।
कुर्वन् स्नानसुगन्धितदेहो ध्यायत्यमुं गाथाम् ॥ ९७

[ मन्त्रः — ]

"कणयमयसहसपत्ते कमलम्मि निवेसिओ य लद्धिजुओ ।
*बहुपाडिहेरकलिओ झायव्वो गोयमसुणिंदो ॥"* ९८

[ मन्त्रध्यानविधिः — ]

भणनात् प्रागथ पश्चात् कर्पूरसुगन्धिजातिपुष्पाद्यैः ।
अष्टाधिसहस्रार्चापूर्वं श्रीगौतमं जपति ॥ सप्तभिः कुलकम् ॥ ९९

[ मन्त्रफलम् — ]

सिद्धोऽथ पञ्चशत्या रात्रौ जापात् शुभाशुभं दिशति ।
नित्यस्मृतिश्च लाभं ग्रामप्रवेशे महत्त्वं च ॥ १००

यदिवा, [ ग्रामप्रवेशमन्त्रः — ]

'प्रणवो नमो भगवते गौतमतः स्वामिने ततः ।
लब्ध्या संपन्नाय च सर्वाभीष्टाग्रतः सिद्धिम् ॥ १०१

कुरु कुरु माया स्वाहा' द्वादशसाहस्रिकोऽस्य करजापः ।
होमो दशांशतोऽसौ सिद्धः सर्वार्थसिद्धिकरः ॥ १०२

यदिवा, [ मन्त्रः, अशिवोपशमनपदानि — ]

"ॐ नमो भगवओ गोयमस्स सिद्धस्स बुद्धस्स ।
अक्खीणमहाणसस्स ह्रीँ अवतर अवतर अक्खीणमहाणसी स्वाहा ॥" १०३

---

1 जिनोंह्रिदृढ॰ J ।

[ मन्त्रफलम् – ]

जापोऽष्टाधिसहस्रैः पुष्पैः श्रीखण्ड-[1]तण्डुलैरस्य ।
सचन्दनसमतन्दुलं मुख्यं वश्याक्षयाय लाभाय ॥ १०४

यद्वा, [ मन्त्र – ]

"अक्खीणमहाणसिलद्धिसंजुओ जयइ गोयमो भयवं ।
जस्स पसाएणऽज्जवि सुसाहुणो सुत्थिया भरहे ॥" १०५

[ मन्त्रफलम् – ]

पूर्वाचार्यकृतैषा गाथा मन्त्रात्मिकाऽष्टशतजप्ता ।
प्रातर्विचरणकाले नित्यं वस्त्रान्नलाभाय ॥ १०६

नैवेद्यं पक्वान्नं परमान्नं दुग्ध-शालि-घृतपूरान् ।
द्राक्षां गौतमपुरतस्तथैव भुक्तिर्निजस्यापि ॥ १०७

[ गणधरमन्त्र – ]

यत्रास्ति 'गौतम'पदं तन्मन्त्रः सैव सा महासिद्धिः ।
स श्रीसुधर्मगणभृत् किन्तु श्रीपुण्डरीकोऽपि ॥ १०८

गणभृन्मन्त्रप्रस्तावाच्च –

"ॐ नमो भगवओ ॐ[2] पाससामिस्स सव्वलद्धि-।
संपन्नस्स भयवं केसिगणहरस्स ह्रीँ स्वाहा ॥" १०९

[ मन्त्रजापविधि – ]

कल्याणकेषु पार्श्वे जातीपुष्पाष्टयुतसहस्रेण ।
नैवेद्य-फलं दत्त्वा मन्त्रमिमं शान्तिदशतस्या ॥ ११०

अष्टोत्तरं सहस्रं करेण परिजप्य[3] सिद्धतां नीतः ।
अष्टाधिशतस्मृत्या गौतम इव न्यामदः [4]सुयतेः ॥ १११

[ कोटयंशमन्त्र, तदैनिग्रहत तष्टकिथ – ]

श्रीममराद् वर्त्रापि यावद्भूप्रवरगणस्थितिमाप्तिः ।
ज्ञानत्रितयं मुख्यं कोटयंशम्तत्र मन्त्रोऽयम् ॥ ११२

---

1 °तन्दुलै° J । 2 'ॐ' नास्ति J प्रतौ । 3 °ज्जे मि° A । 4 सुगते J ।

यत् पश्यति सर्वज्ञोऽनन्तद्रव्यादि तस्य कोटयंशम् ।
अस्य ध्याता पश्यति कोटयंशस्तत्र मन्त्रोऽयम् ॥ ११३

कोटयंशमन्त्रसिद्धावणिमाद्या अष्टसिद्धयोऽस्यात्र[1] ।
मोक्षोऽमुत्र त्रिजगज्जनवन्द्यो विश्वशान्तिकरः ॥ ११४

कोटयंशसमुत्थितौ[2] श्रीवज्रस्वामिशिष्यशाखाभिः ।
तिसृभिः कोटयंशस्य स्मृत्यै कोटीगणो विहितः ॥ ११५

अष्टोत्तरशतमंशा अधुना तत्संख्यपदमयो मन्त्रः ।
तत्सिद्धौ कोटयंशादष्टाधिशतांशमीक्षेत ॥ ११६

अपि दुःषमसमो मेरून् पञ्चाधीती ध्रुवांशका ह्येते ।
तन्त्रैर्विना न मन्त्रो न स्फूर्तिः कालदोषात् तु ॥ ११७

यद्विा,

जिन-सूरि-यतित्रयमिह तेनैव पञ्चपरमेष्ठी ।
जिन-सूरिपदन्यासात् सिद्धोपाध्यायसंग्रहः क्रमशः ॥ ११८

अनुभूय साधुलब्धीः पूर्वभवे गणधरो जिनोऽमुत्र ।
तस्मादिह यतिलब्धिन्यासः मार्गशविधिरेषः ॥ ११९

अर्हत्त्वं मेरुपदे ध्रुवमस्मिन् षोडशांशकास्तद्वत् ।
षोडशबिन्दुभिरंशाः स्याप्यास्तत्त्वं तु नो वेद्मि ॥ १२०

गणभृत् त्रयोदशांशस्तीर्थकृतां केवलागमे पूर्वम् ।
अस्यैव स्यात् 'सर्वश्रोतोलब्धिः 'सेह मतिज्ञानी ॥ १२१

सामान्यकेवलि-भवाभवस्थकेवलजुषोऽवधेः ।
परमात् सर्वानन्तानन्तेभ्योऽवधिजिना एते ॥ १२२

एकादशांशका यद् गणभृत्पश्चाद् भवन्ति सातिशयाः ।
ऋजु-विपुलाभ्यां च मती सर्पिः-क्षीरामृतास्त्रविणः ॥ १२३

एते दशांशका ध्रुवमेतेऽत्र[5] जिना महानिमित्तज्ञाः ।
विद्यासिद्ध-तपोभृत्-पूर्वभृतो वादिनोऽष्टांशाः ॥ १२४

1 °यथात्र A। 2 °समुपस्थितौ J। 3 °र्वश्रुतल° J। 4 सेह यतिज्ञाना A। 5 °तेऽत्र J।

अष्टांशाः शिव-भवगाः शेषांशा मोक्षभाज एवोक्ताः ।
मोक्षतरुबीजमर्हन् शेषाः शाखा-मशाखादि ॥ १२५

मेरुपदस्मरणादिह जिनप्रभा स्तुतिपदानि जैनर्द्धिः ।
हरिमुख्या देव्योऽमूर्जिना देवातिशयरूपाः ॥ १२६

[ मन्त्रोक्तय. — ]

महती बृहती उक्ता न्यासीति चतुर्विधेह मन्त्रोक्तिः ।
महती स्वपाठसिद्धा बृहती चाल्पजपबहुसिद्धिः ॥ १२७

[ मन्त्रोक्तिलक्षणम् — ]

उक्ताऽथ गौतमी सा जाप-तपोऽर्चाऽत्र पूर्वभृद् यावत् ।
न्यासीत्येकत्र पदे बहुदेवीनामविन्यासः ॥ १२८

[ गुरुलक्षणम् — ]

अर्हन्मेरुस्मरणात् तद्रूपो गुरुरतथ [1]तच्छिष्यः ।
चतुरनुयोगी गणभृत् तीर्थानुच्छेदहेतुः स्यात् ॥ १२९

[ शिष्यलक्षणम् — ]

कुलशुद्धो व्रतनिष्ठो बहुशः षट्त्रिंशता गुणैर्युक्तः ।
जिन-गुरुभक्तः शिष्यो योग्यस्तन्मन्त्रराजस्य ॥ १३०

[ मुद्रापञ्चकम् — ]

पूर्वं मुद्रापञ्चकमाह्वान-स्थापने ससंनिधिके ।
सम्यग्निरोधमवगुण्ठनमिति तल्लक्षणं वच्मि ॥ १३१

[ आह्वानादिमुद्रापञ्चकलक्षणम् — ]

आह्वानं प्रसृताञ्जलि संस्थाप्यमवाङ्मुखेऽञ्जली ध्येयम् ।
उर्ध्वाङ्गुष्ठे मुष्टिद्वन्द्वे ध्येयाग्रतस्तृतीयं तु ॥ १३२

अङ्गुष्ठमध्यमुष्टी निरोधनं ध्येयदिक्षु चतसृषु च ।
ध्यातुस्तर्जन्यङ्गुलिभ्रमतः स्यात् तदवगुण्ठनम् ॥ १३३

---

1 तच्छिष्यं A ।

[ मुद्रापञ्चकस्य फलम् — ]

आद्याऽऽह्वयति ध्येयं द्वितीयका स्थापयत्यदः पुरतः ।
संनिधयते[1] तृतीया निरुणद्धि तदग्रतस्त्वपरा ॥ १३४

अवगुण्ठनतो ध्येयं ध्यातुः परतो न याति कुत्रापि ।
ध्यानविसर्जनहेतोरञ्जलिरन्त्यो नमन्मौलिः ॥ १३५

ध्येयस्य विषयं मुद्रापञ्चकं त्विदमीरितम् ।
संप्रदायादिहान्येऽपि भेदास्तत्र न मूढता ॥ १३६

सौभाग्य-सुरभिमुद्रे प्रवचन-परमेष्ठिमुद्रिकाञ्जल्यः ।
ध्यानविधौ गुरुदर्शितरीत्या ज्ञेयाः सनीजाद्याः[2] ॥ १३७

आद्या वश्य-क्षोभे सुरभिः शान्ते तृतीयका ज्ञाने ।
परमेष्ठी सर्वार्था अञ्जलिमुद्राऽऽत्मसेवायै ॥ १३८

[ मन्त्र-विद्या-प्रस्थानलक्षणम् — ]

आप्तुमिष्टे कर्मणि मन्त्रो [3]विद्योच्यतेऽर्चनाकाले ।
प्रस्थानं मोक्षार्थे पीठं पीठाधिपो मेरुः ॥ १३९

[ 'ॐ ह्रीँ श्रीँ' बीजाना फलम् — ]

सर्वत्र स्तुत्यादौ प्रणवाः स्व-परेषु शान्ति-तुष्टिकृते ।
माया वश्य-क्षोभे लक्ष्मीर्ज्ञाने धनख्यातौ ॥ १४०

[ युगपद्बीजत्रिकं न प्रयोग्यम् — ]

युगपत्त्रयं तदादौ न स्यादिति बीजसङ्गतं ध्यानम् ।
निर्बीजं मोक्षकृते एवं [4]विद्या सदारम्भे ॥ १४१

मेरुमुखे एतत्त्रयमिच्छन्त्यपि केचिदस्तु [5]सर्वेदर्थं ।
गुरुभिः सकले मन्त्रे प्रणवनितयं परं कथितम् ॥ १४२

द्वादशपदकचतुष्कं मध्ये चैकं द्वि-षडस्यन्त्रमिदम् ।
सप्तानां वर्गोऽभूत् पदेषु संख्याऽक्षराणां तु ॥ १४३

---

1 °यति तृ° J । 2 °जाद्या° J । 3 वियोयते । 4 विद्यापदारम्भे A ।
5 सर्वैर्थ J ।

[ प्रथमा द्वादशपदी — ]

"रागाइरिउजईणं जए जिणाणं नमो महं होइ ।
एवं ओहिजिणाणं परमोहीणं तहा तेसिं ॥ १४४

"एवमणंतोहीणं अणंताणंतोहिजुयजिणाण नमो ।
सामन्नकेवलीणं भवाभवात्थाण तेसि नमो ॥ १४५

"उग्गतवचरणचारीणमेवमित्तो नमो नमो होइ ।
चउदस-दसपुव्वीणं नमो तहिकारसंगीणं ॥" १४६

त्रिधाऽष्टगर्भितेऽस्मिन् सद्गुरुविज्ञाततादृगुच्चरणे ।
षष्ठीबहुवचनान्ते नमःपुरो[1] बीजरहिते च ॥ १४७

पञ्चाद्रि-नवक-नवका रुद्राः षड्-नन्द-पङ्क्ति-मान्वङ्काः ।
सप्ताष्टौ द्वेचधिकशतं प्रथमार्कपदेऽक्षरैः संख्या ॥ १४८

[ द्वितीया द्वादशपदी — ]

"सव्वेसिं एएसिं एवं विहियाँ अहं नमोक्कारं ।
जमियं विज्जं पउंजामि सो मे" विज्जा "पसिज्झउ स्वाहा ॥" १४९

त्रि-त्रि-चतुर्द्विकमेकं द्वि-द्वि-चतुश्चन्द्र-चन्द्र-युग्म-युगाः ।
एवं द्वादशपदकैरेकोनत्रिंशदक्षरकाः ॥ १५०

प्रागक्षरसंयोगादेक-त्र्येकमिहाक्षरा जिनाङ्कपदैः ।
विद्यापीठं प्रथमं प्रस्थानं सर्वकार्यकरम् ॥ १५१

स्नानाङ्गराग-वसनोज्ज्वल-पुष्पमाला
कोटीर-पुण्ड्रमथ कुण्डलयुग्मकं च ।
ग्रैवेयमङ्गदयुतं वरहारमर्क-
संख्यैः पदैर्वपुषि भावय सूरिमन्त्रे ॥ १५२

आद्यस्तुतिपदैरिति शेषः ॥

1 पुरा A ।

[ तपोविधिः — ]

निरशनमेकं रूक्षान्नपञ्चकाचाम्लकं विकृतिवर्जम् ।
पञ्चदिनान्याचाम्लं निर्विकृतेः पञ्चकाचाम्लम् ॥ १५३

निर्विकृतिश्चानशनं प्रान्ते एकाधिविंशतिदिनानि ।
एवं कोटयंशतपः प्रथमप्रस्थानसिद्ध्यै स्यात् ॥ १५४

निद्रा-प्रमाद-विकथावर्जं प्रतिदिवसमस्य जपः ।
अन्नादिलाभशान्त्यै भानुसहस्रैर्वचसि सिद्ध्यै ॥ १५५

[ वाणीदेवीस्वरूपम् — ]

परमेष्ठि-गुरुडमुद्रायुगेन जापोऽस्य देवतेन्दुनिभा ।
पुस्तकमभयं मुक्तास्रजं वरं तन्वती भुजचतुष्के ॥ १५६

हंसेऽम्बुजे निविष्टा वाग्बीजेऽथान्तरात्महंसे वा ।
ब्राह्मीव पुण्डरीकं सरस्वती गौतमं नमति ॥ १५७

गौतमनन्ता देव्या पुत्रदृशा वीक्षितः प्रदत्तवरः ।
पञ्चमहाव्रतनिष्ठो युगप्रधानागमो भवति ॥ १५८

[ ध्यानविधिः — ]

यदिवा चतुरधिकदले नाभिसरोजे पदानि तावन्ति ।
विन्यस्यान्तः श्रीमहावीरं श्रीगौतमं देवीम् ॥ १५९

ध्यायति तस्य जिनेन्द्रः स्त्रीयपदं गौतमश्च गणभृत्त्वम् ।
देवी च श्रुतकेवलिभावं निर्विघ्नमुपदिशति ॥ १६०

**[ इति प्रथमप्रस्थानविधिः । ]**

*

[ तृतीया द्वादशपदी — ]

"पेणवो नमो भगवओ बाहुवलिस्सेह पर्ण्हसमणस्स ।
ॐ वग्गुं वग्गुं तह निवग्गुमग्गंगयस्स तहा ॥ १६१

"सुमणे सोमणसेवि य महुमहुरे जिणवरे नमंसामि ।
ईरिकाली पिरिकाली सिरिकाली तह महाकाली[१] ॥ १६२

[ चतुर्थी द्वादशपदी — ]

"किरियाए हिरियाए य संगए तिविहकालियं विरिए ।
सुहमाहप्पं सुत्ति साहिंते साहुणो वंदे ॥ १६३

"ॐ किरिकिरिकालिं पिरिपिरिकालिं च सिरिसिरिकालिं ।
हिरिहिरिकालिं दुविहं साहिंतो आयरियकालिं ॥ १६४

"किरिमेरुं पिरिमेरुं सिरिमेरुं तह य होइ हिरिमेरुं ।
आयरियमेरुपयमवि साहिंतो सूरिणो वंदे ॥" १६५

चतुर्थं द्वादशमिति पदम् ॥ स्वाहापदं च मान्ते इति, पदान्येकोनपञ्चाशत् ॥

त्रि-चतुः-पञ्च-षड्ष्टौ त्रि-चतुर्भूतानि वारिधिचतुष्कम् ।
त्रिद्वादशकेऽक्षरसंख्या स्याच्चतुरधिकपञ्चाशत् ॥ १६६

वारिधि-युगाद्रि-षट्त्रिकदशकं वेदाब्धि-वार्धि-युगषट्कम् ।
द्वादशकेऽक्षरसंख्या सर्वाग्रं पञ्चषष्टिरभूत् ॥ १६७

स्वाहेत्येकपदयुतः सप्तकवर्गस्तदक्षरैः सर्वैः ।
श्लोकाः सप्ताष्टाधिकविंशतिवर्णा गुरोर्मन्त्रः ॥ १६८

सूर्यारचक्रयन्त्रे युगकृत्वो लिखितसूर्यसंख्यपदैः ।
अन्तः स्वाहेत्येवं निजगुरुभिर्दर्शितो मन्त्रः ॥ १६९

प्रस्थानरीतिरधुना त्रि-द्वादशकेऽष्टभिः पदैराद्यैः ।
विद्या-महादिपीठं प्रस्थानमिदं द्वितीयं स्यात् ॥ १७०

[ द्वितीयप्रस्थानाधिष्ठात्री देवी — ]

एतस्याधिष्ठात्री शिखरगृहा मानुषोत्तरनगस्य ।
गौतमभक्तिर्दशशतकरा त्रिभुवनेश्वरी देवी ॥ १७१

---

१ महकाली A ।

२

[ जापविधिः — ]

जप्त्वाऽऽद्यमस्थानं पूर्वं जापोऽस्य षोडशसहस्रः ।
पीतध्याने योन्याख्यमुद्रया वश्य-सौभाग्यम् ॥ १७२

एकाधिविंशतिमसौ त्रिसन्ध्यजापेऽथ वश्यकृद् यदिवा ।
शश्वदिहाष्टाधिशतं जप्तो लाभप्रदो विशेषेण ॥ १७३

अस्यान्तःप्रथमपदैश्चतुर्भिरादेशदा सितध्याने ।
आधाय सुरभिमुद्रां विद्या जप्तेह षोडशसहस्राः ॥ १७४

निजदेशे जयहेतुर्जयेति विजयाऽन्यदेशजयदाऽसौ ।
अपराजिता च शत्रोरपराजयेत्यमूर्देव्यः ॥ १७५

[ तपोविधिः — ]

उपवासो रूक्षान्नं आचाम्लत्रितयमपरसचतुष्कम् ।
आचाम्लमपरयुगं उपवासद्वयधिकदशदिवसाः ॥ १७६

[ द्वितीयप्रस्थाने एव विशेषमन्त्रदर्शनं यथा — ]

'ॐ ह्रीँ बाहुबलि-महाबाहुबलिपदात् तु गिरि-महागिरितः ।
वीरादि-बाहुबलये स्वाहा' मन्त्रः सितनिपट्टे ॥ १७७

आलिख्य सुगन्धिदलैः सूर्यसहस्रैस्तु जातिकुसुमानाम् ।
जप्तः प्रश्ने दक्षिणबाहुस्फुरणे शुभं प्रष्टुः ॥ १७८

आलिख्य पादुके द्वे परतो वदने सचन्द्रचन्दनतः ।
सत्पट्टे बाहुबलेः सितपत्रकुसुमैः समभ्यर्च्य ॥ १७९

*उत्सर्गे पञ्चशतीं 'ॐ क्लिरिक्लिरि लम्बबाहुमन नमः ।'*
जप्त्वा शीर्षे कृत्वा शयने च शुभाशुभादेशः ॥ १८०

॥ इति द्वितीयप्रस्थानविधिः ॥

*

## तृतीयप्रस्थानविधिः ।

त्रि-द्वादशकेऽन्त्यचतुःपदयुक्ताग्रेऽर्कमुख्यपदयुगतः ।
पदपद्कादुपविद्यापीठं प्रस्थानमपरं तु ॥ १८१

[ तपोविधि — ]

उपवासो रूक्षान्नान्यष्टात्राचाम्लपञ्चकं रूक्षम् ।
सप्ताहाद् वाऽऽचाम्लं रूक्षयुगं निरशनं प्रान्ते ॥ १८२

[ ध्यानं, तत्फलं च — ]

पञ्चाधिविंशतिदिनान्यत्रापि तपसि पूर्ववद् ध्यानम् ।
स्त्रैणसुरं नहि दृश्यं मौनं स्थानेषु पञ्चसु च ॥ १८३

जातीकुसुमसहस्रद्वादशजापे सरस्वती वरदा ।
उपवासेऽष्टोत्तरसहस्रजापान्निशि स्वप्नः ॥ १८४

अरुणध्यानेनारुणकुसुमैर्गिरिमुद्रया रूपसहस्रा॰ ।
जापेऽस्य राजवश्यं त्रैलोक्यातिशयसंपत्तिः ॥ १८५

[ तृतीयप्रस्थानाधिष्ठात्री देवी — ]

एतस्याधिष्ठात्री पद्मह्रदे वसति देवी श्रीः ।
विजया-जया-जयन्ती-नन्दा-भद्रासहोपान्ता ॥ १८६

सर्वाङ्गे भूषणधरा सकलेन्द्रविमोहिनी निधिभृद् ।
गौतमभक्तिर्गौतममन्त्रध्यातुर्दिशति लक्ष्मीम् ॥ १८७

॥ इति तृतीयप्रस्थानविधिः ॥

*

## चतुर्थप्रस्थानविधिः ।

[ पञ्चदेवाद्रिरहस्यम् — ]

चतुरर्कपदान्तर्या पुनरुक्ताक्षरयुगाऽत्र पञ्चपदी ।
मन्त्रादिपीठमेतत् तुर्यं प्रस्थानमाभाति ॥ १८८

[ तपोविधि — ]

उपवासो रूक्षाशनपञ्चकमाचाम्लमनशनं चाष्टौ ।
दिवसास्तपसि प्राग्वद् ध्यानं गुरुगौतमे पूजा ॥ १८९

[ चतुर्थप्रस्थानाधिष्ठाता देवः — ]

पोडशसहस्रयक्षाधिपतिर्विंशतिभुजोऽस्य तु स्वामी ।
गणिपिटकयक्षराजोऽणयणपत्नीसुरीसहितः ॥ १९०

[ जापविधिः, तत्फलं च — ]

परमेष्ठिमुद्रयाऽसौ जापात् पोडशसहस्रतः सिद्धः ।
भातर्जलगण्डूषान् सप्त त्यक्त्वा निजपदाधः ॥ १९१

चम्पित्वा वैरिवपुर्ध्यानेऽथाङ्गुष्ठमुद्रयाऽङ्गुष्ठात् ।
व्यस्तं त्रिसन्ध्यमष्टाधिकशतजापे सुखस्तम्भः ॥ १९२

तथा,

येन धृतस्तस्याख्यां विलिख्य कोष्ठेऽथ वामपादाधः ।
मुष्टिद्वयमुद्राभृत् त्रिसन्ध्यजापोऽस्य बन्दिमोक्षाय ॥ १९३

मेरुमयमन्त्रराजोऽधिष्ठातारोऽस्य भान्ति सर्वेन्द्राः ।
आचाम्लान्यथ पोडश निरन्तरं पूर्ववद् ध्यानम् ॥ १९४

पञ्चमस्थानतपः प्रत्येकं शक्तितश्च युगपद् वा ।
सुयतेरेतद्ध्यानात्त्रहितहृदो यान्ति तपसि दिनाः ॥ १९५

शुक्लध्याने जापः[1] प्रवचन-परमेष्ठिमुद्राभ्याम् ।
लक्षं त्रिलक्षमथवा गौतम इव सर्वसिद्धिपदम् ॥ १९६

सर्वार्हज्जन्मविधि-स्नात्रे हेतुश्च मेरवः पञ्च ।
तेनेह मेरुशब्दादर्हन् सज्ञानकल्याणः ॥ १९७

समति-श्रुतावधि-मनः-केवलमिति मेरुपञ्चकं क्रमतः ।
शान्तिर्हृद्धिर्वश्यं क्षोभो मुक्तिश्च बन्दिमोक्षश्च ॥ १९८

मेरुध्यानाद् बन्दिमोक्ष इत्यर्थः ।

" प्रणवोदरेऽरिमूर्ति ऐँ श्रीँ प्रेँ ह्सौँ किरिनग-पवन-नमः " ।
मन्त्रं विलिख्य वलये 'फोँ ह्सौँ' प्रणवैः-क्रमोत्क्रमतः ॥ १९९

1 भ्यतः J ।

जापोऽष्टाधिसहस्रैः[1] सितपत्रैर्निरशनत्रयं यदिवा ।
आचाम्लत्रयमित्थं रुष्टमरिं शमयति नृपं वा ॥ २००

" प्रणवान्तं वश्यवपुः ऐँ श्रीँ सिरिमेरुतो मरुद्-व्योम " ।
श्रीखण्डेन लिखित्वा सितपत्रैः सहस्रपरिजापः ॥ २०१

परिजप्तपत्र-फल-कुसुमदानतो भर्तृवश्याय ।
मध्याङ्गुल्याः पर्वणि तृतीयके त्र्यक्षरो जापः ॥ युग्मम् ॥ २०२

कार्तिक्यामाद्यां वा राकायां निरशनं विधायादौ ।
द्वासप्ततिराकान्ते द्व्यधिसप्ततिनिरशनैः क्रमतः ॥ २०३

सौधर्मेन्द्रासनदक्षिणपादाधः[2] स्वातिधिष्ण्य-द्युरात्रौ ।
वज्रासनेन जापोऽधिमेरु यद्विवेत्यमावास्याः[3] ॥ युग्मम् ॥ २०४

प्रथमप्रस्थाने वा स्तुतिपदसंख्यं च निरशनविधानम् ।
मुदा आनुपूर्विंयुगादष्टाधिसहस्रपरिजपात् सिद्धिः ॥ २०५

पञ्चमस्थानांशैः कोटचंशः फलद एव विषमांशः ।
मध्यफलस्तु समांशो गुरुक्रमादंशगणनमन्वेष्यम् ॥ २०६

लग्नस्यार्चाकाले विद्यालग्नेऽथ मेरुमन्त्रांशाः ।
षोडश देया यस्मादेते तीर्थान्तमनुयान्ति ॥ २०७

गौतमकेवलिनोक्ता एकादशमेरवः श्रुतधरैस्तु ।
दश वज्रेण नवैते नागेन्द्राद्यैर्नवाँदिपँश्चान्ताः ॥ २०८

अष्ट-नवव्युच्छित्तिर्नागेन्द्राः सप्त वैद्यिकाः षडमी ।
चान्द्राः पञ्च-मुनि-नगा....मया परम् ॥ २०९

द्वि-त्र्यधिक-दँशैँ[3]-गजैर्कँ-जिनैँ-रदैंनसंख्यलब्धिपदी ।
दष्टैकोनौं पूर्णा चत्वारिंशद् दशैंसमेताः ॥ २१०

॥ इति श्रीसिंहतिलकसूरिदर्शित-
मन्त्रराजरहस्ये देवाद्रिपञ्चकरहस्यम् ॥

*

1 °स्रै. शत J । 2 °णपदाध° A । 3 °वास्याम् J ।

[ ससदेवादिरहस्यम् – ]

त्र्यधिकदशलब्धिपदैर्मुनिमेरुभिरथ दर्शयामि मन्त्रविधुम् ।
वलयाकृत्या लेख्या पञ्चमस्थानीह वलयपञ्चकतः ॥ २११

तथाहि,

" आइम्मि इक्कपणवो नमो जिणाणं च ओहि य जिणाणं ।
परमोहिजिणाण तहा नमो य सव्वोहि य जिणाणं ॥ २१२

" तहऽणंतोहिजिणाणं अणंताणंतोहिजुयजिणाण नमो ।
सामन्नकेवलीणं भवाभवत्थाण तेसि नमो ॥ २१३

" उग्गतवचरणचारीणमेवमित्तो नमो नमो होइ ।
चउदस-दसपुव्वीणं नमो तहिक्कारसंगीणं ॥ २१४

" सव्वेसि एएसि नमोक्कारं तहा अहं किच्चा ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा ॥ " २१५

षट्-सप्त-नवाष्ट-नवैकादश-नव-नन्द-धर्म-रवि-नवकम् ।
सप्ताष्ट-त्रि-त्रि-चतुर्द्विकैके-युग(द्विकयुगैके)-युग्म-चतुरेकाः ॥ २१६

ऐक-द्वि-चतुर्युग्मं प्रथमस्थानरस-युगपदानाम् ।
वर्णभूतयुगर्तुवैः संख्या देव्यादिकं प्राग्वत् ॥ २१७

स्नान-विलेपन-वासो-माला-कोटीर-तिलक-कुण्डलकम् ।
ग्रैवेयं श्रीवत्सो हारः केयूरयुग्ममाद्यपदैः ॥ २१८

" पणवो नमो भगवओ बाहुब्लिस्सेह [1]पण्णसमणस्स ।
ॐ वग्गु वग्गु निवग्गु निवग्गु च सुमण-सोमणसे ॥ २१९

" महुमहुरे ॐ इरियाए "किरियाए तहेव "गिरियाए ।
"पिरियाए "सिरियाए "हरियाए आयरियाए स्वाहा । " २२०

शैलाश-रसेन्द्रिय-षट्-त्रि-चतुः-पञ्च-नवानि युगषट्कम् ।
द्वे प्रस्थानेऽमुष्मिन् द्व्यधिसप्ततिवर्णपरिपाटी ॥ २२१

---

1 पण्हस' J ।

मधुमधुरजिनानन्तरमाये तीर्थान्तरे सुधर्माद्यौ ।
'इरि' शब्दात् तीर्थान्तरभवसल्लब्धिसूरिविन्यासः ॥ २२२

'किरि' सद्द्रव्यपदं 'गिरि' सर्वगुणाः 'पिरी'ति पर्यायाः ।
'सिरि हिरि आयरिय'पदोक्तेरुत्पत्ति-ध्रौव्य-विगमवचः ॥ २२३

द्रव्यं गुण-पर्यायोत्पत्ति-ध्रुव-विगमकलितमिह वेत्ति ।
अर्हन्निव तीर्थान्तरभावी सूरिः प्रवचनाय ॥ २२४

प्राग्वद् देवीजापात्रापि यतेस्तथैव निर्दिष्टौ ।
[1]'पण्हिसमणेति स्वप्ने समग्रमेतत् सुभग-वश्ये ॥ २२५

'पणत्रो इरि-किरि-गिरि-सिरि-हिरि-पिरि-आयरियकालि-महाकालि ।
पत्रणं गयणं' तइए पत्थाणे देविविन्नासो ॥ २२६

भूँताऽम्बुधि-पँञ्चैँक-पट्ई-वेदँ-युगैरक्षरास्तु शैलगुँणाः ।
त्रिभस्थाने लक्ष्मीर्देवी पदिवा महाकाली ॥ २२७

'इरि किरि' चक्रैकभुजा 'गिरी'ति रसैं-भूतदिक्कुमार्योऽथ ।
'सिरि हिरि' नन्दा भद्रा जया च विजयाऽपराजिया(ता) ॥ २२८

शासनविद्यादेव्यः 'पिरी'ति 'आयरियकालि' जिनदेव्यः ।
[2]'महकाली' सङ्घस्य च गत्युपदेष्ट्री विरोधिशान्तिकरी ॥ २२९

'ॐ इरिइरि-किरिकिरि-गिरिगिरि-पिरिपिरि-सिरिसिरि-हिरिहिरिकालि ।
आयरियकालि-पत्रणो गयणं' तह मंतपीढम्मि ॥ २३०

शैलैं-रसैंपट्कैं-युग्मं पदाक्षरैः पञ्चवोर्द्दिसंख्याऽभूत् ।
तुर्ये मन्त्रात् पीठे जापाधिष्ठायकं प्राग्वत् ॥ २३१

देवाद्रिसमानपदैः षाल्पिदैर्भाव्यमत्र तत् सत्यम् ।
न्यूनाधिकैरपि तथा गुरुवशतस्तत्र न भ्रान्तिः ॥ २३२

'इरिइरि-किरिकिरि' कल्पाधिपतिपदं 'गिरिगिरी'ति भुवनेन्द्राः ।
'पिरिपिरि' च वानमन्तरनाथाः 'सिरिसिरि' च चन्द्रार्काः ॥ २३३

---

1 पण्हिसमणे' J । 2 महाकाली J ।

'हिरिहिरि' वरगणिपिटकमप्रमुखेन्द्रसमानदेवविन्यासः ।
'आयरि' लोकान्तिकसुरविन्यासो ध्यानदृश्यवपुषोऽमी ॥ २३४

तपोऽधिष्ठायकादि प्राग्वत् ॥

'मंणवो माया-लच्छी-ईरि-किरि-गिरि-पिरि-सिरि-हिरि-आयरिय ।
मेरुपयं' सव्वत्थवि पज्जंते मंतरायम्मि ॥ २३५

त्रिकं-युगपट्कं-रस-युग्मपदाक्षरैर्भूतलोकसंख्याऽत्र ।
सर्वपदान्यष्टरसा वर्णा युग-लोक-जैनरत्नमितौः ॥ २३६

श्लोका देश वर्णास्तु स्वरसंख्या सूरिमन्त्रराजस्य ।
सर्वेन्द्रा अधिपतयः प्राग्वज्जापस्तपश्चापि ॥ २३७

एष विशेषः प्रागुक्तसुरीपूज्या जिनाश्रया देव्यः ।
'इरि'तः श्रुतदेव्यः 'किरि'तोऽभयदा 'गिरी'ति निर्वृतिदा ॥ २३८

'पिरि'तोऽत्र शान्तिदेव्यः 'सिरि-हिरि' श्री-ह्री स्वनामफला ।
धृति-कीर्ति-बुद्धि-लक्ष्म्यो जम्भा-मोहादयश्चात्र ॥ २३९

'आयरि' यत्प्रदा देव्य एता उत्सर्गसंस्मृतेः साक्षात् ।
तीर्थान्तरेषु साधूपदिष्टकार्याणि तन्वन्ति ॥ २४०

तेन गुरुर्नन्द्यादावुत्सर्गं वितनुतेऽयमेकस्याः ।
सर्वासामिह स स्यात् क्रमशः श्रुतदेवतादिफलम् ॥ २४१

सङ्घे श्रुते तपस्यपि महत्त्वमथ दुष्टदेवतो रक्षा ।
शैल-पुर-चैत्यरक्षणमष्टाङ्गनिमित्तविज्ञानम् ॥ २४२

सर्वार्थसिद्धिः श्रीः ह्रीः क्षुद्रोपद्रवचिन्ताशक्तिः सङ्घे ।
आसां तपो निरशनं 'प्रणव-ह्रीँ' जाप उत्सर्गे ॥ २४३

'इरि'शब्दाच्च्यवनमहः किरि' जन्ममहो 'गिरि' नृपपदर्द्धिः ।
'पिरि' दीक्षाकल्याणं 'सिरि' कैवल्यमथ समवसरणम् ॥ २४४

'हिरि'तत्रिजगत्पूजा 'आयरि' संघः समोक्षपदलक्ष्मीः ।
एतद्रूपो ध्येयः श्रीवीरो मन्त्रराजो वा ॥ २४५

1 तस्याधि° J ।

दिग्मात्रमियं व्याख्या सम्यग् जानन्ति पूर्वविद एताम् ।
यस्मादस्य स्मरणात् त्रिभवे शुद्धिस्त्रिशुद्धस्य ॥ २४६

षष्ठे वलये चतुरधिर्विंशतिजिनमूर्तयः स्वलक्ष्मयुताः ।
सप्तमके तावन्त्यो विद्याः स्युर्वर्द्धमानाद्याः ॥ २४७

अन्तश्च वीरमूर्तिः 'सुमणे-सोमणस' नाम चमरधरौ ।
पादाधो ग्रहनवकं दक्षिणतो गौतमो भगवान् ॥ २४८

मूर्तिर्दक्षिणकोणे ऊर्ध्वे देवी सरस्वती वामे ।
लक्ष्मीरधश्च वामे गणिपिटकाख्यः स यक्षेन्द्रः ॥ २४९

दक्षिणतो मानुषनगशिखरे त्रिभुवनत्रिशुलभृद्देवी ।
आत्मगुरुरात्ममूर्तिः सौधर्मेन्द्रादयो यथायुक्ति ॥ २५०

यक्षस्य च पणपन्नीनाम्नो निकटेऽथ यक्षिणीनग्ना[1] ।
सुरकुलकेशाऽऽच्छादितपृष्ठिः सत्फलितवृक्षतले ॥ २५१

दक्षिणकटीस्थ-दक्षिणपाणिर्वामकरमोदकसपात्रा ।
'ॐ पाशाङ्कुश-माया सयक्षिणी नमः' इति मन्त्रः ॥ २५२

करजापे मागुलक्षश्चैको जातीकुसुमानि सहस्राः ।
दश होमश्च दशांशः सिद्धा सत्पुण्यफलदा स्यात् ॥ त्रिभिर्विशेषकम् ॥ २५३

इति श्रीसिंहतिलकसूरिविरचिते
मन्त्रराजरहस्ये
सप्तदेवाद्रिरहस्यमिदं प्रदर्शितम् ॥

*

स्तुतिपदी( ३२-२४ )रहस्यम् ॥

द्वात्रिंशतमुत चतुरधिर्विंशतिमादौ विधाय तल्लब्धिपदीम् ।
प्रागुक्तमेव शेषं गुरुवशतः किञ्चिदन्यदपि ॥ २५४

"जिण-ओहि-परमोहि-अणंतोहि-अणंताणंतोहिजिणे ।
केवलि-भवत्थकेवलि-अभवत्थ य केवलीणं च ॥ २५५

1 °नीलमा A ।

"उज्जुमई विउलमई वेउव्वियलद्धि-सव्वलद्धीणं ।
पण्णासमणाण[1] तहा तह जंघाचारणमुणीणं ॥ २५६

"विज्जासिद्धाण तहा आगासगामीण तह य निच्चं पि ।
आमोसहि-विप्पोसहि-खेलोसहि-जल्लमोसहीणं च ॥ २५७

"सव्वोसहि-आसीविस-दिट्ठिविसाणं च तह य निच्चं पि ।
वयणविस-तत्तलेसाण पणमिमो सीयलेसाण ॥ २५८

"चउदस-दसपुव्वीणं इक्कारसअंगसुत्तधारीणं ।
संभिन्नस्सोयाणं दुब्बलसंगसव्वसिद्धाण ॥ २५९

"उग्गतवचरणचारीण वत्तीस थुइपमाणमिणं ।
आइम्मि नमो ॐ ह्रीँ पढमपया छट्ठीवहुवयणं ॥ २६०

"सव्वेसिं एएसिं एवं किच्चा अहं नमोकारं ।
जमियं विज्जं [2]पउंजामि सा मे विज्जा [3]पसिज्झउ स्वाहा ॥" २६१

पञ्चाद्रि-नन्द-नयकं रुद्राः पर्णव-दशाद्रि-गज-नवेकम् ।
सप्ताष्ट-दश[4]-भयाष्टक-नवपञ्चैक-सप्त-शैल-गजाः ॥ २६२

[5]सप्त-भय-नन्द-शैलाः सूर्याष्टार्कद्वयं मणत्र-माया ।
सर्वत्रादाविति युग-रसार्थं सर्वेऽक्ष-वह्नि-गुणाः ॥ २६३

शेषशशि-लोकवर्णैः त्रिशती-षट्-षष्टिरत्र च श्लोकाः ।
एकादश-चतुरधिदशवर्णा द्विगुणपदसंख्या ॥ २६४

"खीरासव-महुआसव-अमयासवलद्धियाण पत्तेयं ।
अक्खीणमहाणसिलद्धियाण संभिन्नसोयाणं ॥" २६५

"तत्तो पयाणुसारि य लद्धीणं तह य वीयवुद्धीणं ।
कुट्ठवुद्धीण अह य सव्वपया ॐ नमो पुव्विं ॥" २६६

"जिण-ओही आरब्मा वेउव्वियलद्धि जाव इक्कारो ।
चउदस-दसपुव्वीणं तेय-वयण-इक्कारसंगीणं ॥" २६७

1 पण्हास° J । 2 पउजे J । 3 पसीयउ J । 4 °दशहया° A । 5 सप्तहय° A ।

एए चउवीसपया नायव्वा परमक्खरिसंतम्मि ।
मायावज्जविरहिए नूणं सुमरिज्जए निचं ॥ २६८

"सव्वेसिं एएसिं किच्चा अहं नमोकारं ।
जमियं विज्जं पउंजामि सा मे विज्जा [1]पसिज्झउ स्वाहा ॥" २६९

नवे-दश-शून्यैकाऽङ्कौ गजाङ्क-भय-शैलतः पदाष्टकजाः ।
वर्णा द्विनगा एकादशपद्यां स्युर्नवतिवर्णाः ॥ २७०

नन्दाद्रि-रवि-नगाष्टकमिति पञ्चपदेषु गुण-युगा वर्णाः ।
प्रणवा जिनमाः शेषाः पदवर्णाः शशि-गुणप्रमिताः ॥ २७१

सर्वाक्षरसंयोगाद् द्विशती पञ्चधिकाः श्लोकाः ।
चतुरक्षराधिकाष्टावाद्यप्रस्थानके ज्ञेयाः ॥ २७२

"पणवो नमो भगवओ वाहुवलिस्सेह पण्णसमणस्स ।
ॐ वग्गु वग्गु निवग्गु सुमण-सोमणसे महुमहुरे स्वाहा ॥" २७३

त्र्यक्ष-रस-पञ्च-पावक-गुण-युग-भूताक्षरैः पयोधि-गुणाः ।
वर्णा द्विप्रस्थाने देवी स्वप्नादिकं प्राग्वत् ॥ २७४

"इरिकाली[2] किरिकाली पिरिकाली हिरि य कालि-मरु-गयणं ।"
तइयं पत्थाणमिणं अट्ठारस अक्खरा तत्थ ॥ २७५

'इरियाए किरियाए पिरियाए सिरियाए तह य हिरियाए ।
कालि-महाकालि' तुरियं उपविज्जा अक्खराइ छव्वीसं ॥ २७६

'पणवो किरिकिरिकालि पिरिपिरि सिरसिरि हिरिहिरि आयरियकालि ।
मरुयं गयणं' मंडलपीढे वन्ना य[3] तेतीसं ॥ २७७

"ॐ किरिकिरि ॐ पिरिपिरि ॐ सिरिसिरि ॐ हिरिहिरि ॐ आयरिय ।"
दुगुणमेरु इह मंते इगवीसवन्ना एवं छपत्थाणा ॥ २७८

पञ्चप्रस्थानाक्षरयुग-गुण-भूमिर्द्विगुणपदकैर्वर्णाः ।
युक्ताः श्लोकाः पञ्चाधिकदश-हस्त्येकवर्णमिति ॥ २७९

---

1 पसीयउ J । 2 'काली गिरि' J । 3 तित्तीसं A ।

पञ्चमस्थानाक्षरयुग-गुणै-र्भूमिर्जिनाङ्कैपदवर्णाः ।
युक्ताः श्लोका द्वादशवर्णा अष्टौ महामन्त्रे ॥ २८०

परमेष्ठिमुद्रयाऽसौ मन्त्रः सकलोऽपि हिमरुचिः श्वेतः ।
एकं लक्षं जप्तः शान्तिकृते,व्योमतो मुक्त्यै ॥ २८१

द्विमस्थानं पीतध्याने षोडशसहस्रकरजप्तम् ।
सौभाग्यमुद्रया यदि स्त्रीणां श्रीणां महावश्यम् ॥ २८२

त्रिमस्थानं जातीकुसुमार्कसहस्रजापतः सिद्धम् ।
सारस्वतं शुभाशुभमुपदिशति निशि स्वप्नमध्ये ॥ २८३

तुर्यं मस्थानमिदं किंशुकशुकमुखसमानवर्णमिह ।
षोडशसहस्रजप्त गिरिमुद्रातश्च वश्यकरम् ॥ २८४

पञ्चमस्थानपदीवर्णोद्भवधूमसंकुलं शत्रुम् ।
यो ध्यायति त्रिसन्ध्यं दूरात् तस्यारिरपयाति ॥ २८५

नगमन्त्रः कृष्णरुचिश्चक्रोधनमुद्रया त्रिसन्ध्यमपि ।
अष्टाधिशतं मासं यावत् शत्रोर्ध्रुवं मृत्युः ॥ २८६

यद्विवा,

दिक्-कालासन-मुद्रावर्णैरेकैकपदमपि ध्यातम् ।
तत् तत् करोति कार्यं शान्त्याद्यं शुद्धधर्मस्य ॥ २८७

रदनै-र्जिनैसमस्तुतिपदयुक्तः पञ्चामराद्रिभून्मन्त्रः ।
वलयपट्केन दृष्टो मध्ये श्रीवीरमूर्तिधरः ॥ २८८

इति श्रीसिंहतिलकसूरिकृते
मन्त्रराजरहस्ये
३२/२४ स्तुतिपदीरहस्यम् ॥

## षोडशस्तुतिपदीपूर्वं देवाद्रिपञ्चकरहस्यम् ॥

### प्रथमं विद्यापीठम् ।

अथ षोडशस्तुतिपूर्वमस्थानपट्कसर्वपदैः ।
कल्याणत्रिकरूपं ध्यानं यत् तदधुना वक्ष्ये ॥ २८९

"जिण-ओहि-परमोही तहऽणंताणंतओहिजिणे ।
केवलि-भवत्थकेवलि-अभवत्थ य केवलीण च ॥ २९०

"चउदस-दसपुव्वीणं इक्कारसअंगि-कुट्ठबुद्धीणं ।
वीयाइमबुद्धीणं तहुग्गतवचरणचारीणं ॥ २९१

"गोयमसामिस्स महादाणस्स सुहम्मसामिणो तह य ।
सोलसपयाण पुव्वि नायव्वो ॐ नमो सद्दो ॥ २९२

"एएसिं सव्वेसिं एवं काउं अहं नमोकारं ।
जमियं विज्जं पउंजामि सा मे विज्जा [1]पसिज्झउ स्वाहा ॥" २९३

॥ इति प्रथमं विद्यापीठम् ॥

*

### द्वितीयमुपविद्यापीठम् ।

"ॐ इरिइरिकालि किरिकिरिकालि पिरिपिरिकालि गिरिगिरिकालि ।
सिरिसिरिकालि हिरिहिरिकालि आयरियकालि स्वाहा ॥ २९४

समवसरणे पूजा, उच्छीर्षके स्वप्नं शुभाशुभोपदेशः ॥

"पणवो नमो भयवओ वाहुवलिस्सेह पण्णसमणस्स ।
